# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## द्वितीया परीक्षा (नूतनपुस्तकाधारिता)

**दिनाङ्कः** – 03-09-2023 **अङ्काः** 100

**पूर्वाह्णः** - १०:००तः १२:३०पर्यन्तम् **समयः** – **सार्धद्विहोराः**

ಸೂಚನೆಗಳು : ೧. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀ ಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.

೨. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.

Instructions: 1. Write the Samskrita answers in Devanaagari script only.

2. Write the question numbers correctly.

1. **एकवाक्येन संस्कृतेन उत्तरं लिखत । ( षण्णामेव )** 6

१. इन्दुः कदा उदेति ?
२. गौः कीदृशी भवति ?
३. रामायणस्य रचयिता कः?
४. कीदृशं राजकुमारं मन्त्री उपादिशत् ?
५. तुलसीदलसेवनेन कस्य वृद्धिः भवति ?
६. सविता कदा रक्तः भवति ?
७. उपमन्युः कुत्र अपतत् ?
८. महाभारते कति पर्वाणि सन्ति ?

2. **वाक्यद्वयेन वा त्रयेण वा संस्कृतेन उत्तरं लिखत। ( त्रयाणामेव )** 6

१. के परमेश्वरस्य प्रियाः भवन्ति ?
२. गावः किं किं खादन्ति ?
३. श्रीरामस्य के गुणाः अनुसुरणयोग्याः सन्ति ?
४. वेदव्यासः कदा शान्तिमलभत ?
५. माता ध्रुवं कीदृशं भगवन्तं सेवितुम् उपदिशति ?

3. **विषयद्वयम् अधिकृत्य त्रीणि वाक्यानि संस्कृतेन लिखत।** 6

१. इन्दुः २. श्रीरामः ३. ऋष्यशृङ्गपुरम्

4. **श्लोकौ पूरयित्वा अर्थं मातृभाषया आङ्ग्लभाषया वा लिखत ।** 8

१. पुण्यस्य............ । ................ यत्नतः ॥

२. छायामन्यस्य ......। ............... सत्पुरुषा इव ॥

5. **ससन्दर्भं संस्कृतभाषया विवृणुत ।** 6

१. "एषा वृत्तिः नोचिता ।

1. कः पाठः ? 2. कः अवदत् ? 3. कं प्रति अवदत् ?

२. "**वत्स**, कठिनं तपः चरितुं नायं कालः तव " ।

1. कः पाठः?   2. का अवदत् ?   3. कम् अवदत् ?

**6. लोकोक्तेः अर्थं कन्नडभाषया आङ्ग्लभाषया वा विवृणुत ।** (द्वयोः एव) **4**

१. विषादप्यमृतं ग्राह्यम्।

२. संहतिः कार्यसाधिका ।

३. नैकं चक्रं परिभ्रमति ।

**7. संवत्सराणां नामानि** श्लोकरूपेण **लिखत ।** **4**

१. **सर्वजित्** ........।............ दुर्मुखौ॥   २. पिङ्गलः ........। .......... क्रोधनोऽक्षयः॥

**8. चतुर्थपदं लिखत ।** **3**

१. इन्दुः - चन्द्रः :: राजा ..........   २. सिंहः - अकारान्तः – :: गौः ..........

३. सह - तृतीया :: परितः ..........

**9. विजातीयपदं लिखत ।** **3**

१.सदुक्तिः, सुवाक्यम्, सुवचनम्, सूक्तिः   २. कावेरीं, कवेरी, कावेरीः, कावेर्यौ

३. पठतः, पठथः, पठावः, पठथ

**10. अन्यलिङ्गे परिवर्तयत ।** **( त्रीणि एव )** **3**

१. नप्ता   २. पञ्चमः   ३. पौत्रः   ४. पत्नी

**11. पठ् धातोः, गम् धातोः वा रूपाणि लोट्-लकारे पुरुषत्रये वचनत्रये च लिखत ।** **3**

**12. रिक्तस्थानानि कोष्टकदत्तशब्दस्य उचितैः विभक्ति/पुरुष/रूपेण पूरयत ।** **3**

१. ................ परितः भूमिः भ्रमति। ( रवि )   २. त्वं छात्रः ................ । (अस्- लट् )

३. वयं मथुराम् ....... । ( गम्- लङ् )

**13. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत ।** **(त्रीणि एव )** **3**

१. <u>रात्रौ</u> इन्दुः उदयते।   २. तस्य <u>तिस्रः</u> भार्याः आसन् ।

३. *भारतं तु <u>सर्वे</u> पठन्ति* ।   ४. *कावेरी* <u>तलकावेरी स्थाने</u> उद्भवति।

**14. एतेषां पर्यायपदानि लिखत।** ( त्रयाणामेव ) 3

१. नदी २. सह ३. पूजा ४. दृष्ट्वा

**15. एतेषां विरुद्धार्थकानि पदानि लिखत।**( त्रयाणामेव ) 3

१. सुरक्षितम् २. प्रियः ३. वर्धते ४. प्रभूतम्

**16. सन्धिं विभज्य सन्धिनाम लिखत।** (**त्रीणि एव** ) 3

१. न्यवेदयत् २. अभीष्टम् ३. इहैव ४. रथोत्सवः

17. सन्धिं **कृत्वा** नाम लिखत । (**त्रीणि एव** ) 3

१. परम+ऋषयः २. इति+एव ३. मन्ये+अहम् ४. गत्वा+अवदत्

**18. वाक्ये योजयत ।** (**त्रीणि एव** ) 3

१. नमः २. पातुम् ३. यथा-तथा ४. कदाचित्

**19. एतेषां धातु-लकार-पुरुष-वचनानि लिखत ।** ( त्रयाणामेव ) 3

१. सन्ति २. अकरोत् ३. वन्दे ४. वर्तते

**20. सुबन्तानाम् अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत ।** (त्रयाणामेव ) 3

१. विधोः २. तृणानि ३. प्रजाः ४. भूमिः

**21. प्रकृतिं प्रत्ययं च पृथक् कुरुत/योजयत ।** (त्रयाणामेव ) 3

१. नी+क्त्वा २. उप+भुज्+ल्यप् ३. अवलम्ब्य ४. लब्धुम्

**22. इतरवचनद्वयं लिखत ।** (त्रयाणामेव) 3

१. ......., ........., श्रृङ्गाणि २. बुद्धिः ........., .............

३. ......., ........., पादाः ४. ............... ............, युष्मासि

**23. कर्तृपदं कर्मपदं क्रियापदं च पृथक् कृत्वा लिखत ।** 2x1½=3

१. असौ वेदराशिं विभज्य अददात्। २. तामेव कथां पठाम्यहम् ।

**24. सोदाहरणं कन्नडभाषया आङ्ग्लभाषया वा विवृणुत । ( द्वावेव )** 4

१. लङ्लकारः २. यण्सन्धिः ३. ल्यबन्ताव्ययम्

25. **कर्णाटकभाषया आङ्ग्लभाषया वा अनुवदत ।** (चतुर्णामेव) **4**

१. रमा गाम् आनयति । २. सत्पुत्राः पितरौ सेवन्ते ।

३. त्वं ह्यः कुत्र अगच्छः ? ४. गृहात् बहिः अवकरं मा क्षिपत ।

५. सीता रामेण सह वनम् अगच्छत्।

26. **संस्कृतभाषया अनुवदत ।** (चतुर्णामेव) **4**

1. Salutations to Sita and Rama. ಸೀತಾರಾಮರಿಬ್ಬರಿಗೆ ನಮಸ್ಕಾರ.
2. Let us achieve good in our life. ನಮ್ಮ ಜೀವನದಲ್ಲಿ ಶ್ರೇಯಸ್ಸನ್ನು ಪಡೆಯೋಣ.
3. You all are coming to my home. ನೀವೆಲ್ಲರೂ ನನ್ನ ಮನೆಗೆ ಬರುತ್ತಿದ್ದೀರಿ.
4. Devadutta writes with a pen. ದೇವದತ್ತನು ಲೇಖನಿಯಿಂದ ಬರೆಯುತ್ತಿದ್ದಾನೆ.
5. Students are standing near the teacher.
   ವಿದ್ಯಾರ್ಥಿಗಳು ಶಿಕ್ಷಕರ ಹತ್ತಿರ ನಿಂತಿದ್ದಾರೆ.

--------------------